# ॐ श्रीपरमात्मने नमः। अथ द्वादशोऽध्यायः। भक्तियोगः।

| | |
|---|---|
| अर्जुन उवाच।<br>एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते।<br>येचाप्यक्षरमव्यक्तम् तेषां के योगवित्तमाः॥१॥ | अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव।<br>मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि॥१०॥ |
| श्रीभगवानुवाच।<br>मय्यावेश्य मनो ये माम् नित्ययुक्ता उपासते।<br>श्रद्धया परयोपेताः ते मे युक्ततमा मताः॥२॥ | अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः।<br>सर्वकर्मफलत्यागम् ततः कुरु यतात्मवान्॥११॥ |
| ये त्वक्षरमनिर्देश्यम् अव्यक्तं पर्युपासते।<br>सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम्॥३॥ | श्रेयो हि ज्ञानमभ्यासात् ज्ञानाद्ध्यानं विशिष्यते।<br>ध्यानात्कर्मफलत्यागः त्यागाच्छान्तिरनन्तरम्॥१२॥ |
| सन्नियम्येन्द्रियग्रामम् सर्वत्र समबुद्धयः।<br>ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः॥४॥ | अद्वेष्टा सर्वभूतानाम् मैत्रः करुण एव च।<br>निर्ममो निरहङ्कारः समदुःखसुखः क्षमी॥१३॥ |
| क्लेशोऽधिकतरस्तेषाम् अव्यक्तासक्तचेतसाम्।<br>अव्यक्ता हि गतिर्दुःखम् देहवद्भिरवाप्यते॥५॥ | सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः।<br>मय्यर्पितमनोबुद्धिः यो मद्भक्तः स मे प्रियः॥१४॥ |
| ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मत्पराः।<br>अनन्येनैव योगेन मां ध्यायन्त उपासते॥६॥ | यस्मान्नोद्विजते लोकः लोकान्नोद्विजते च यः।<br>हर्षामर्षभयोद्वेगैः मुक्तो यः स च मे प्रियः॥१५॥ |
| तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।<br>भवामि नचिरात्पार्थ मय्यावेशितचेतसाम्॥७॥ | अनपेक्षः शुचिर्दक्षः उदासीनो गतव्यथः।<br>सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः॥१६॥ |
| मय्येव मन आधत्स्व मयि बुद्धिं निवेशय।<br>निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः॥८॥ | यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।<br>शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः॥१७॥ |
| अथ चित्तं समाधातुम् न शक्नोषि मयि स्थिरम्।<br>अभ्यासयोगेन ततः मामिच्छाप्तुं धनञ्जय॥९॥ | समः शत्रौ च मित्रे च तथा मानापमानयोः।<br>शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः॥१८॥ |

| | |
|---|---|
| तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्।<br>अनिकेतः स्थिरमतिः भक्तिमान्मे प्रियो नरः ॥१९॥ | ये तु धर्म्यामृतमिदम् यथोक्तं पर्युपासते।<br>श्रद्दधाना मत्परमाः भक्तास्तेऽतीव मे प्रियाः ॥२०॥ |

ॐ तत्सत्।

इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे

भक्तियोगो नाम द्वादशोऽध्यायः॥

**श्रीकृष्णार्पणमस्तु ॥**